# पीठिका

'सम्यक् कृतम्' इति संस्कृतम्। संस्कृतं विश्व वन्दिता, विश्वभाषा अस्ति। बहु भाषाणां जननी इत्यपि विश्रुता अस्ति। संस्कृत भाषा अध्ययनेन किं प्रयोजनम् इति अधुना केचन जना: पृच्छन्ति। परन्तु ते संस्कृतस्य महत्त्वं न जानन्ति एरा।

संस्कृतं केवलं पुरोहितानां भाषा न। एषा सर्वेषां भाषा। अत्र केवलं वैदिक मन्त्राणि, ज्योतिषं वा न सन्ति। अस्यां भाषायां गणितं, विज्ञानं, ज्योतिषं, खगोलशास्त्रं, वैद्यशास्त्रं, पाकशास्त्रं, शिल्पशास्त्रं, समाजशास्त्रं, साहित्यं, एवमेव सर्वेषु विषयेषु समृद्धम् अस्ति। अत्रि किं नास्ति इति पृष्ट्व्यं भवति। संस्कृत अध्ययनेन भारतीय संस्कृते: संरक्षणं भवति।

एतादृशी भव्य रम्यो सरल, हृदयङ्गम भाषा संस्कृतम्। सर्वे: संस्कृत अध्ययनं भवितव्यम्।

संस्कृते आर्यभट: भास्कर:, वागभट:, सुश्रुत:, चरक:, पाणिनि:, कालिदास:, भास:, भारवि:, दण्डि:, बाण:, इत्यादय: महनीया:, साधका: आसन् इति तु आनन्ददायकं विषयम्। कालिदासस्य अभिज्ञान शाकुन्तलम् विश्वे प्रथम स्थाने स्थितं नाटकम् अद्यापि। सुश्रुतसंहिताया, चरकसंहितायां उक्तानि आरोग्य सम्बन्धि विषया: अध्यापि अनुसरणयोग्या:। वराहमिहिरादय: विज्ञानिन: प्रतिपादितानि विषयानि अद्यापि संशोधनयोग्या:। प्रहेलिका: चाटू श्लोका: च सन्ति। एवमेव सर्वेषु विषयेषु उक्तानि, प्रतिपादितानि विषयानि संग्रहयोग्या: अनुसरणयोग्या: च सन्ति।

अत: एतादृशीं वैशिष्ट्पूर्णा संस्कृत भाषाया: अध्ययनम् अनिवार्यं, सूक्तं च अस्ति। विश्वे विभिन्ना, विशिष्टा संस्कृत भाषाया: अध्ययनार्थं सर्वत्र प्रयत्न: करणीय:। अत: प्रथम कक्ष्यात: संस्कृत भाषा अभ्ययनं प्रारम्भं करणीयम्।

## अधिगममानकानि, - तेषां महत्त्वम्

छात्रः शालापरिसरे विविधेषु स्तरेषु समार्थ्यं सम्पादयति। व्यक्तित्वविकसस्य, जीवनकौशलम् विषयाणां ज्ञानं, भाषावगमनम्, इत्यादिरुपेण जीवनसामर्थ्यं सम्पादयति। तदर्थं पाठ्यविषये पाठ्येतरविषयेच छात्रस्य भागग्रहणम् अनिवार्यम्। एतादृशशैक्षणिकसाधनमेव 'अधिगममानकानि' इति कथ्यन्ते।

**अधिगममानकस्य आवश्यकता का?**

- मूलज्ञानस्य सम्पादनार्थं, विविधसामर्थ्यवर्धनार्थम्, जीवनमौल्यानां सम्पादनार्थम्, अध्ययनस्य ध्येयसम्पदानार्थम् अधिगममानकस्य आवश्यकता अस्ति।
- छात्रस्य सहजतया एव किञ्चित् सामर्थ्यं पूर्वमेव भवति, तत् किमिति अवगम्य तस्य पोषणं कर्तुं नैकविध – उपायाः समाश्रयणीयाः, तदर्थम् अधिगममानकस्य आवश्यकता वर्तते।
- अधिगमसन्दर्भे छात्रः बोधनप्रक्रियायां कदाचित् क्लेशम् अनुभवति, अतः तस्य क्लेशस्य दूरीकरणार्थम् प्रत्येकः छात्रः स्पष्टं ज्ञातुम् अस्य अनिवार्यता अस्ति।
- कक्ष्यायां बोधनं रुचिकरं भवेत्, प्रयोजनाधारितं भवेत् तदर्थम् अस्य अनिवार्यता अस्ति।
- अधिगमस्य उद्धिष्टं किमिति ज्ञापनीयम्, तस्य परिधिः कः इति निर्धारणम्।
- छात्रस्य प्रोत्साहनम् अनिवार्यम्, अतः तस्य सामर्थ्यानुगुणं मार्गदर्शनं कर्तुम् अधिगममानकस्य उपयोगः करणीयः। तेन सर्जनात्मकः अधिगमः सिध्यति।
- सर्जनात्मक – अधिगमद्वारा ज्ञानसम्पादनं, जीवने तस्य समन्वयनम् – एतदर्थम् अधिगममानकं सहकरोति।

### भाषाशिक्षणे अधिगममानकम्

अध्ययनप्रक्रियावसरे विविधस्तरीयाः छात्राः भागं वहन्ति। वयसानुगुणम् अधिगमः (Learning) अपि विद्यते। भाषाध्ययनेन एतानि कौशलानि अवश्यं सम्पादनीयानि। तत्र प्रथम भाषा / द्वितीय भाषा / तृतीया भाषा एवं याकापि भाषा भवतु नाम। यथा श्रवणम्, भाषणम्, पठनम्, लेखनम्, एतानि भाषाकौशलानि सम्पादनीयानि। एतैः सह शब्दसम्पत्तिः, व्याकरणम्, संवहनम् सर्जनशीलता, अभिव्यक्तिः, जीवनमौल्यानि, भाषासामर्थ्यम् एतत् सर्वं सम्पादनीयं भवति। एतेन छात्रस्य व्यक्तित्वविकासः वर्धते।

### शिक्षणे भाषायाः अधिगमस्य प्राथमिक – अनिवार्यता

- प्राथमिक शिक्षणं नाम भाषाशिक्षणमेव।
- भाषाद्वारा एव अधिगमः, चिन्तनम्, अभ्यासः, ज्ञानम् वैचारिकी शक्तिः, विवेकः – एतत् सर्वं सम्पाद्यते।
- छात्राणां भाषासामर्थ्यस्य स्तरः शिक्षणस्य स्तरःश्च अनयोः मध्ये धनात्मकः प्रभावः भवति।
- भाषाद्वारा एव अक्षरज्ञानम् पठनम्, लेखनम्, तेषां समुचितकाले उपयोगः एतत् सर्वं सिध्यति।
- शिक्षणस्य प्रमुखं साधनं भाषा। यदि अपेक्षितानुगुणं भाषासामर्थ्यं वर्धते तर्हि, मौल्ययुत शिक्षणमपि लभ्यते।
- सम्यक् भाषायाः अध्ययनं यः करोति, तस्य गणितम् इत्यादि सर्वेषां विषयाणां ग्रहणशक्तिरपि सिध्यति।
- विविधानि कौशलानि सम्पादयितुं अध्ययनशीलतायाः सम्पादनार्थं भाषायाः अधिगमः अनिवार्यः।
- संवहनसामर्थ्यम् अधिगमस्य, अभ्यासस्य च सहायकं भवति।
- यस्य भाषासामर्थ्यं भवति, सः सहजतया बुद्धिमान भवति, तस्य आत्मविश्वासः वर्धते।
- यस्य भाषासामर्थ्यं भवति तस्य चिन्तनशक्तिः स्वतन्त्र भवति, विषयग्रहणसामर्थ्यं, अभिव्यक्तिसामर्थ्यम्, ज्ञानार्जनसामर्थ्यं च वर्धन्ते।

## भाषाशिक्षणे सम्पत्स्यमानानि कौशलानि (मानकानि)

- श्रवणम्, भाषणम्, पठनम्, लेखनम् – एतेषां भाषाकौशलानां सम्पादनम् नित्यव्यवहार कौशलसामर्थ्यप्राप्ति: भवति।
- भाषाया: उपयोग: समुचितरीत्या मौखिकरूपेण लिखत रूपेण च भवेत् । तादृशव्यवहार सामर्थ्य सम्पादनं भवति।
- पठनकौशलम्, लेखनकौशलम् – अनयो: सम्पादनम् तयो: समुचितरूपेण अभिव्यक्तिसामर्थ्य वर्धनम् भवति।
- भाषाशुद्धता सिध्यति। प्रभावीरूपेण परस्परं संवहन कौशलं वर्धते।
- भाषाया: आत्मा व्याकरणम् इति विदुषाम् आशय:। अत: भाषाया: प्रयोगावसरे व्याकरणस्य ज्ञानम् अनिवार्यम् तादृशनिर्दुष्टवाक्यरचनाकौशलं सम्पादयति।
- समाजे उत्तमं व्यवहारं कर्तुं भाषा अनिवार्या:। तदर्थं सुन्दरवाक्यं कर्तुं सामर्थ्यं प्राप्नोति।
- समाजस्य इतराभि: भाषाभिस्सह व्यवहर्तुं - तथा विचारविनिमयार्थं भाषणकौशलं सम्पादयति।
- सदाचार:, सुचारुसम्भाषणम्, उत्तम अभिव्यक्ति: इत्यादि सामर्थ्यं सिद्यति।
- रचनात्मकसामर्थ्यं सिध्यति । सर्जनात्मकदृष्टि: वर्धते।
- अध्ययनशीलता, पुस्तकसंस्कृति: च वर्धते।
- संस्कृतभाषाया: प्राचीनता, साहित्यप्रकार:, भाषासौष्ठवं भाषावैशिष्ट्यं किमिति च ज्ञानं छात्र: प्राप्नोति।
- तौलनिकम् – अध्ययनार्थं विशेषज्ञानं प्राप्नोति।
- सरलसुन्दरवाक्यानि प्रयोक्तुं सक्षम: भवति।
- संस्कृतभाषाया: अध्ययनेन चिन्तनशक्ति: वर्धते।
- संस्कृतभाषाध्ययनेन सुभाषितानां नीतिकथानां महाकाव्यानां परिचय: भवति।
- व्यासभासकालिदासादीनां श्रेष्ठकवीनां परिचय: भवति।
- रामायणम्, महाभारतम्, पुराणानि, नाटकानि एतेषां परिचय: भवति।
- बाल्ये एव उत्तमनीते: अवबोध: भवति।
- छात्र: अध्ययनसन्दर्भे एव उत्तम संस्कारं प्राप्नोति।
- परोपकारबुद्धि: , सेवाभाव: , त्यागमनोभाव:, सहनशक्ति: च वर्धन्ते।
- उपनिषदां कथा: जीवनकौशलं बोधयन्ति।
- भासविरचितनाटकानाम्, कालिदासविरचित नाटकानाम् अध्ययनं प्रयोगश्च कथमिति अवगच्छन्ति।
- अभिनय सामर्थ्यं वर्धते।
- भोजराजस्य चम्पूकाव्याध्ययनं कृत्वा सरागं चम्पूकाव्यं पठन्ति।
- पाणिने: अष्टाध्यायीं पठित्वा संस्कृत व्याकरणं जानन्ति।

- सङ्गीतम्, साहित्यम्, कला-इत्यादिषु विषयेषु अभिरुचिं प्रदर्शयन्ति।
- प्राचीनपरम्परा, भारतीयपरम्परा, ऋषिमुनिसंस्कृति: एतेषां विशेषज्ञानं प्राप्नुवन्ति।
- राष्ट्रीयभावैक्यं सम्पादयन्ति।
- भ्रातृत्वभाव: संस्कृतद्वारा सिध्यति।